C G F



# 2023

## SANSKRIT — HONOURS

**Paper : SEC-1**

**Full Marks : 100**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

1. (a) यथेच्छं **पञ्चवाक्यानि संस्कृतभाषया अनूद्य देवनागरलिप्या** लिखत। 2×5

(i) আমাদের দেশে বহু মানুষ সংস্কৃতভাষায় কথা বলেন।
(Many people in our country speak in the Sanskrit language.)

(ii) শিক্ষক মহাশয় আমাদের সাহিত্য পড়াচ্ছেন।
(The teacher is teaching us literature.)

(iii) পৃথিবী সূর্যের চারিদিকে ঘোরে।
(The Earth revolves around the Sun.)

(iv) সীতা রামের সঙ্গে বনে গিয়েছিলেন।
(Sītā went to the forest with Rāma).

(v) ছাত্রেরা গ্রন্থাগারে গিয়ে নূতন বইগুলি পড়ছেন।
(After arriving at the library, students are reading the new books.)

(vi) দুই বন্ধু মাঠে খেলা করছে।
(Two friends are playing in the ground.)

(vii) ছাত্রজীবনে পড়া এবং খেলার মাধ্যমে শরীর এবং মনের বিকাশ হয়।
(During studentlife, the body and mind develop through reading and play.)

(b) अधोविद्यमानेषु यथेच्छम् ***अनुच्छेदद्वयं वङ्गभाषया आङ्गलभाषया*** वा अनूद्यताम्। 20×2

(i) आसीत् पुरा हिरण्यकशिपुर्नाम दैत्यपतिः। तस्य हिरण्याक्षं नाम अग्रजं विष्णुः निजधान। अतः हिरण्यकशिपुः विष्णोः परमद्वेषी अभवत्। तस्य पुत्रः प्रह्लादः बाल्यादेव विष्णुभक्तः आसीत्। पुत्रस्य विष्णुभक्तिं दूरीकर्तुं स पुत्रं गुरुगृहे प्रेषितवान्। राजाज्ञया गुरुरपि तथा कर्तुं यत्नमकरोत्। परन्तु प्रह्लादः विष्णुपूजनात् न निवृत्तः अभवत्। ततः गुरुः सर्वं राज्ञे निवेदयामास। अतिक्रुद्धः राजा तस्य वधार्थं रक्षीपुरुषान् आदिदेश। रक्षीपुरुषाश्च तं हननार्थं वध्यभूमिम् आनीतवन्तः।

(ii) युद्धेन न हि जगतः कल्याणं सम्भवति। राष्ट्राणि द्वेषवशात् स्वार्थसिद्ध्यर्थं च युद्धे प्रवर्तन्ते। राष्ट्रनेतारः शीततापनियन्त्रितेषु प्रकोष्ठेषु स्थित्वा युद्धस्य सिद्धान्तम् उद्घोषयन्ति। परन्तु साधारणाः सैनिकाः युद्धक्षेत्रेषु

म्रियन्ते। युद्धं मातुः अङ्कात् पुत्रं, पत्न्याः बाहुबन्धात् पतिं च हरति। युद्धेन देशानाम् अर्थनीतिः विध्वस्ता भवति। केवलं केचन शस्त्रविक्रेतारः एव लाभवन्तः भवन्ति। अतो युद्धं सर्वथा वर्जनीयम्। परस्परम् आलोचनेन समस्यायाः समाधानं करणीयम्। प्रतिवेशिदेशैः सह सुसम्पर्कश्च स्थापनीयः।

(iii) भारतवर्षे संस्कृतभाषायाः भारततत्त्वस्य च अध्ययनं गभीरतया प्रचलति। भारतवर्षाद् बहिरपि बहुषु विश्वविद्यालयेषु संस्कृतभाषायाः अध्ययनं भवति। वैदेशिकाः संस्कृतभाषां ज्ञातुं भारतवर्षस्य ऐतिह्यं च आलोचयितुं सर्वदा उत्सुकाः तिष्ठन्ति। वयम् अवश्यं संस्कृतभाषायां वक्तुं लेखितुं च सामर्थ्यम् अर्जयामः। संस्कृतभाषया लिखितानि उपनिषदः रामायणम् महाभारतम् इत्यादीनि शास्त्राणि पठामः। भारतवर्षस्य गौरवम् आविश्वं प्रचारयामः। प्राचीनकाले भारतवर्षे प्रायः सर्वाणि शास्त्राणि संस्कृतभाषया रचितानि। साहित्यस्य दर्शनस्य चिकित्साविद्यायाः पदार्थविद्यायाः च चर्चा संस्कृतभाषया एव अभवत्। संस्कृतभाषायाः ज्ञानं विना भारतवर्षस्य बोधः न सम्भवति। आधुनिककाले संगणकविज्ञाने अपि संस्कृतभाषायाः उपयोगं सर्वे जानन्ति।

2. अधोविद्यमानम् अनुच्छेदद्वयं पठित्वा अन्ते प्रदत्तानां प्रश्नानाम् उत्तरं लिखत।

(a) कस्माच्चित् नगराद् दूरे आसीद् एकं वनम्, यस्मिन् सर्वे पशवः पक्षिणश्च शान्तिपूर्वकम् अवसन्। तद् वनं हरिणः कच्छपः काकः मूषिकः इति चतुर्णाम् अभेद्यमित्राणां गृहम् आसीत्। प्रतिसायं ते मिलित्वा दिनस्य घटनाः आलोचयन्ति स्म। किन्तु एकस्मिन् दिवसे हरिणः अतिभीतः आसीत्। "आखेटकाः सर्वत्र जालानि प्रसारयन्तः सन्ति। अपि पलायनस्य कश्चित् मार्गः वर्तते न वा" इति हरिणः अपृच्छत्। काकः अवदत् – "आम्, अस्ति। अस्माकं मित्रं मूषिकः अपि जानाति" इति।

काकः पूर्वदृष्टं वृत्तान्तम् अश्रावयत्। काकः उक्तवान् यत् – केभ्यश्चिद् दिनेभ्यः पूर्वम् अहम् अत्यद्भुतं किमपि अपश्यम्। आखेटकस्य जाले कपोतकुलं बद्धम् आसीत्। ते सर्वे कपोताः स्वपक्षान् वृथा स्फालयन्तः आसन्। सहसा सर्वैः कपोतैः एकत्रीभूय चञ्चुभिः जालम् आदाय आकाशं प्रति उड्डयनं कृतम्। ते शीघ्रम् उड्डीय मित्रस्य मूषिकस्य गृहं समागताः। तीक्ष्णदन्तैः सः जालस्य खण्डनम् अकरोत्। मुक्ताः कपोताः उड्डीय गताः। ते अस्माकं मित्रं मूषिकं प्रति कृतज्ञाः आसन्। यदा कथा समाप्ता तदा हरिणः जलार्थं गतः, अन्यानि त्रीणि मित्राणि च फल-गुल्म-पत्राणां भक्षणे च रताः आसन्।

(i) उपरि प्रदत्तायां कथायां कानि तावत् चत्वारि अभेद्यमित्राणि? ते कुत्र अवसन्?

(ii) हरिणः किमर्थम् अतिभीतः आसीत्?

(iii) आखेटकानां जालात् पलायनस्य कश्चित् मार्गः अस्ति न वेति हरिणप्रश्नस्य उत्तरं कः दत्तवान्? सः किम् उक्तवान्?

(iv) आखेटकस्य जाले बद्धं कपोतकुलं किम् अकरोत्?

(v) कपोताः किमर्थं मूषिकं प्रति कृतज्ञाः आसन्? (2+1)+3+(1+2)+3+3

(b) अस्ति कस्मिंश्चिदधिष्ठाने जीर्णधनो नाम वणिक्पुत्रः। स च विभवक्षयात् देशान्तरगमनमना आसीत्। तस्य गृहे लोहभारघटिता पूर्वपुरुषोपार्जिता तुला आसीत्। तां च कस्यचित् वणिजः गृहे न्यासरूपेण समर्प्य स देशान्तरं प्रस्थितः। ततः सुचिरं कालं देशात् देशान्तरं परिभ्रम्य पुनः स्वपुरमागत्य तं श्रेष्ठिनमुवाच–भोः श्रेष्ठिन्, दीयतां मे सा निक्षेपतुला। श्रेष्ठी आह– भोः, नास्ति सा तुला। मूषिकैर्भक्षिता सा।

जीर्णधन आह– भोः श्रेष्ठिन्, नास्ति दोषस्ते यदि मूषिकैर्भक्षितेति। ईदृगेवायं संसारः।

(i) जीर्णधनः क आसीत्?

(ii) स कथं देशान्तरं गन्तुम् ऐच्छत्?

(iii) किमासीत् तस्य गृहे?

(iv) कदा स स्वपुरं प्रत्यागतवान्?

(v) न्यासरूपेण गच्छितायाः तुलायाः प्रत्यर्पणकाले श्रेष्ठिना किमुक्तम्?

(vi) तच्छ्रुत्वा च जीर्णधनः किम् उक्तवान्? 2+3+2+2+3+3

3. अधोनिर्दिष्टेषु यथेच्छं विषयम् **एकम्** आधारीकृत्य **संस्कृतभाषया देवनागरलिप्या च** प्रबन्धः रचनीयः। 10×1

(a) तव प्रियः कविः

(b) स्वामी विवेकानन्दः

(c) परिवेशसंरक्षणम्।

4. यथेच्छं प्रसङ्गम् **एकं** स्वीकृत्य **संस्कृतभाषया देवनागरलिप्या च** पत्रं लिखत। 10×1

(a) महाविद्यालये अनुपस्थितेः कारणम् उल्लिख्य अवकाशलाभाय संस्कृतविभागाध्यक्षं प्रति आवेदनपत्रं लेखनीयम्।

(b) दुर्गापूजायां तव गृहागमनाय आमन्त्रणं ज्ञापयित्वा परमसुहृदं प्रति पत्रमेकं लेख्यम्।

(c) युष्माकं लोकालये डेङ्गुरोगस्य प्रकोपं तत्प्रतिविधानानुरोधं च कृत्वा स्वास्थ्यविभागस्य आधिकारिकं प्रति पत्रमेकं लिखत।